५८

पं.२ ॥ श्रीगणेशायनमः॥ श्रीशुकउवाच भगवानपितारात्रीः शारदोत्फुल्लमल्लि
का वीक्ष्यरंतुंमनश्चक्रेयोगमायामुपाश्रितः १ तदोडुराजःककुभःकरैर्मुखं
प्राच्याविलिंपन्नरुणेनशंतमैः सचर्षणीनामुदगाच्छुचोमृजन्प्रियःप्रियाइ
वदीर्घदर्शनः २ दृष्ट्वाकुमुद्वन्तमखंडमंडलंरमाननाभंनवकुंकुमारुणं व
नंचतत्कोमलगोभिरंजितंजगौकलंवामदृशांमनोहरं ३ निशम्यगीतंतद
नंगवर्द्धनंव्रजस्त्रियःकृष्णगृहीतमानसाः आजग्मुरन्योन्यमलक्षितोद्यमा
सयत्रकान्तोजवलोलकुंडलाः ४ दुहंत्योभियुयुःकाश्चिद्दोहंहित्वास
मुत्सुकाः पयोधिश्रित्यसंयावमनुद्वास्यापरायुयुः ५ परिवेषयंत्यस्तद्धि
त्वापाययंत्यःसुतान्पयः शुश्रूषंत्यःपतीन्काश्चिदश्नंत्योऽपास्यभोजनं ६ राम

लिपंत्यः प्रमृज्यंत्यो ऽन्याश्चांजंत्यः काश्च लोचने॥ व्यत्यस्तवस्त्राभरणाः काश्चित्कृ
ष्णांतिकं ययुः ७ ता वार्यमाणाः पतिभिः पितृभिर्भ्रातृबंधुभिः गोविंदापहृतात्मा
नो न न्यवर्त्तंत मोहिताः ८ अंतर्गृहगताः काश्चिद्गोप्योऽलब्धविनिर्गमाः
कृष्णं तद्भावनायुक्ता दध्युर्मीलितलोचनाः ९ दुःसहप्रेष्ठविरहतीव्रतापधुता
शुभाः ध्यानप्राप्ताच्युताश्लेषनिर्वृत्त्या क्षीणमंगलाः १० तमेव परमात्मानं
जारबुद्ध्यापि संगताः जहुर्गुणमयं देहं सद्यः प्रक्षीणबंधनाः ११ राजोवाच॥
कृष्णं विदुः परं कांतं न तु ब्रह्मतया मुने गुणप्रवाहोपरमस्तासां गुणधियां कथं १२
श्रीशुक उवाच उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः द्विषन्नपि हृषीकेशं कि
मु ताधोक्षजप्रियाः १३ नृणां निःश्रेयसार्थाय व्यक्तिर्भगवतो नृप अव्ययस्या

पं· व्र अप्रमेयस्यनिर्गुणस्यगुणात्मनः २४ कामंक्रोधंभयंस्नेहमैक्यंसौहृदमेवच ॥
२ त्वं नित्यंहरौविदधतोयांतितन्मयतांहिते २५ नचैवविस्मयःकार्योभवताभग
वत्यजे योगेश्वरेश्वरेकृष्णेयतएतद्विमुच्यते १६ ताद्दष्टांतिकमायाताभ
गवान्व्रजयोषितः अवदद्वदतांश्रेष्ठोवाचःपेशैर्विमोहयन् १७ श्रीकृष्ण
उवाच स्वागतंवोमहाभागाःप्रियंकिंकरवाणिवः व्रजस्यानामयंकच्चिद्ब्रूत
गमनकारणं १८ रजन्येषाघोररूपाघोरसत्वनिषेविता प्रतियातव्रजंने
हस्थेयंस्त्रीभिःसुमध्यमाः १९ मातरपितरःपुत्राभ्रातरःपतयश्चवः विचिन्व
तिह्यपश्यंतोमाकृढ्वंबंधुसाध्वसं २० दृष्टंवनंकुसुमितंराकेशकररंजि
तं यमुनाऽनिललीलैजतरुपल्लवशोभितं २१ तद्यातमाचिरंगोष्ठंशुश्रू राम २

तीः क्रंदंतिवत्साबालाश्चतान्पाययतदुह्यत २२ अथवामदभिस्नेहाद्भवत्यो
यंत्रिताशयाः आगताह्युपपन्नंवःप्रीयंतेमयिजंतवः २३ भर्तुःशुश्रूष
णंस्त्रीणांपरोधर्मोह्यमाययातद्बंधूनांचकल्याण्यःप्रजानांचानुपोषणं २४
दुःशीलोदुर्भगोवृद्धोजडोरोग्यधनोपिवा पतिःस्त्रीभिर्नहातव्योलोकेप्सु
भिरपातकी २५ अस्वर्ग्यमयशस्यंचफल्गुकृच्छ्रंभयावहं जुगुप्सितंचसर्व
त्रऔपपत्यंकुलस्त्रियः २६ श्रवणाद्दर्शनाद्ध्यानान्मयिभावोनुकीर्तनात ॥
नतथासन्निकर्षेणप्रतियाततोगृहान् २७ श्रीशुकउवाच इतिविप्रियमा
कर्ण्यगोप्योगोविंदभाषितं विषण्णाभग्नसंकल्पाश्चिंतामापुर्दुरत्ययां २८ कृ
त्वामुखान्यवशुचःश्वसनेनशुष्यद्बिंबाधराणिचरणेनभुवंलिखंत्यः॥अस्रैरुपात्तमषिभिः

पं० [illegible]कुमानि तस्थुर्मृजंत्य उरुदुःखभरास्मतूष्णीं २९ प्रेष्ठं प्रियेतर
२ मिव प्रतिभाषमाणं कृष्णं तदर्थविनिवर्तितसर्वकामाः नेत्रे विमृज्य रुदितो
पहतेस्म किंचित्संरंभगद्गदगिरोब्रुवतानुरक्ताः ३० गोप्यऊचुः मैवं विभोर्ह
ति भवान्गदितुं नृशंसं संत्यज्य सर्वविषयांस्तव पादमूलं भक्ताभजस्वदु
रवग्रहमात्यजास्मान्देवो यथादिपुरुषो भजते मुमुक्षून् ३१ यत्पत्यपत्य
सुहृदामनुवृत्तिरंग स्त्रीणां स्वधर्म इति धर्मविदा त्वयोक्तं अस्त्वेवमेतदु
पदेशपदे त्वयीशे प्रेष्ठो भवांस्तनुभृतां किल बंधुरात्मा ३२ कुर्वंति हि
त्वयि रतिं कुशलाः स्व आत्मन्नित्यप्रिये पतिसुतादिभिरार्तिदैः किं स रास
न्नः प्रसीद परमेश्वर मा स्म छिंद्या आशां धृतां त्वयि चिरादरविंदनेत्र॥ ३

क ३३ चित्तं सुखेन भवतापहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये
पादौ पदं न चलतस्तव पादमूलाद्यामः कथं व्रजमथो करवाम किं वा ३४
सिंचांग नस्त्वदधरामृतपूरकेण हासावलोककलगीतहृच्छयाग्निं॥
नो चेद्वयं विरहजाग्न्युपयुक्तदेहा ध्यानेन याम पदयोः पदवीं सखे ते ३५
यर्ह्यंबुजाक्ष तव पादतलं रमाया दत्तक्षणं क्वचिदरण्यजनप्रियस्य अ
स्प्राक्ष्म तत्प्रभृति नान्यसमक्षमंग स्थातुं त्वयाभिरमिता बत पारयामः
३६ श्रीर्यत्पदांबुजरजश्चकमे तुलस्या लब्ध्वापि वक्षसि पदं किल भृत्यजु
ष्टं यस्याः स्ववीक्षणकृतेऽन्यसुरप्रयासस्तद्वद्वयं च तव पादरजः प्रपन्नाः ३७
तन्नः प्रसीद वृजिनार्दन तेऽङ्घ्रिमूलं प्राप्ता विसृज्य वसतीस्त्वदुपासनाशा